National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 167-171
© 2026 NJHSR
www.sanskritarticle.com

**Ruchika Upadhyay,**
Research scholar :
Department of Vastu Shastra,
Shri Lal Bahadur Shastri National –
Sanskrit University, Delhi

**Dr. Yogendra Kumar Sharma,**
Assistant professor,
Department of Vastu Shastra,
Shri Lal Bahadur Shastri National -
Sanskrit University, Delhi

**Correspondence:**
**Ruchika Upadhyay,**
Research scholar :
Department of Vastu Shastra,
Shri Lal Bahadur Shastri National –
Sanskrit University, Delhi

# वास्तुशास्त्रे पञ्चमहाभूत-प्राकृतिकशक्तिनां विमर्शः

**Ruchika Upadhyay, Dr. Yogendra Kumar Sharma**

संस्कृतसाहित्ये वेद: सर्वतो प्राचीनतमोग्रन्थ: वर्तते। तत्र बहव: विषया: सन्ति ये मानवजीवनोपयोगीविषया: वर्तन्ते। वेदे धर्म-कर्म-इहलौकिक-पारलौकिकसम्बद्धा: सूक्तय: सन्ति। इहलौकिकविषयेषु मानवजीवनाय ये मूलभूतावश्यकताकारकवस्तुनि सन्ति तेषु महत्वपूर्णमस्माकम् आवास:। आवास: एव सर्व सुखकारकानाम् आधार: अस्ति।[1] गृहनिर्माणेन सर्व पुण्यानां साफल्यं वर्तते।[2]

अस्माकं ऋषय: गृहनिर्माणाय बहव: सिद्धान्तानां व्याख्यानं प्रतिपादिता:। वेदस्य यस्मिन् भागे सिद्धान्ता: भागे सिद्धान्ता: वर्णिता: सन्ति स: अथर्ववेद: तत्रापि अभिन्न वेदरूपेण स्थापत्यवेद: इति नाम्ना उच्यते। आवासव्यवस्थाया: सम्पूर्णसिद्धान्ता: स्थापत्यवेदे वर्णिता: सन्ति।

भूम्यां स्थितेषु समस्त जीवेषु एकाविशेषता अयं अस्ति यत् एतासां रचना आकाश-वायु-अग्नि-जल-पृथिव्यादि पञ्चमहाभूतानां मिश्रणेन अभवत्।[3] समस्तजीवेषु पञ्चमहाभूताः निश्चितानुपाते विराजन्ते। वस्तुत: एष: एव वास्तुशास्त्रस्य प्रमुखः प्रतिपाद्यविषयः वर्तते यत् मनुष्यः स्वसाफल्यर्थं तुष्ट्यर्थश्च स्व-आवासे आकाश-वायवादि पञ्चमहाभूतानामोत्तमतया उपयोग: कथं कारयेत्?

अस्य सम्यक्तया चिन्तनमभवत्। आवासे अस्माकं सुविधा-सुरक्षा-शान्त्यर्थं मुख्यतया भूमि-जल-वायु-तेजस्य उपयोग: क्रीयते। ऐतेषां चतुर्णां महाभूतानां सु-उपयोगेन आकाशसंज्ञकः महाभूतः स्वतः सक्रियः भूत्वा स्वकार्य करोति ।

**वास्तुशब्दस्य व्युत्पत्ति अर्थग्रहणश्च**

वैदिकवाङ्गमये वास्तुपदस्य अर्थ: सामान्यतया गृहस्य वाचक: भवति, विशेषार्थे निवासोपयुक्तभूखण्ड: इति। वास्तुशब्दस्य व्युत्पत्ति: **"वस् निवासे"** धातो: **"वसेरगारे णिञ्च"** इति उणादिसूत्रेण तुण् प्रत्यय: योगेन भवति यस्यार्थ: **यत्र जीवा: वसन्ति तत्स्थानमेव वास्तु**।[1] जीवनं सुखमयं शान्तिमयञ्च कर्तुं या: या: मूलभूतावश्यकता: भवन्ति, तासु एका आवास-व्यवस्था अर्थात गृहम् वर्तते।[2] अमरकोषग्रन्थेष्वपि वास्तुशब्दस्यार्थ: चयनिता भूमिरेव, अस्य पर्याय: वेश्मभू: इति स्वीकृता।[3] वस्तुत: न केवलं गृहमपि च दुर्ग-प्रासाद-भवन-मठ-क्षेत्र-वाटिका-सेतुबन्ध-देवालय-नगराणि एतानि सर्वाणि वास्तुपदैव समाहितानि।[4] मोनीयरविलियम्समहोदयेनोक्तम् "the appropriate site or foundation of a house, building or dwelling place" इति।[5] विभिन्नकोषग्रन्थेष्वपि वास्तुपदस्यर्थ: वासयोग्यभूमि: इति कथितम्।

**पञ्चमहाभूतात्मकसृष्टि**

ब्रह्मा सृष्टय: रचनाकार: अस्ति। तेन चत्वार: जीवा: असृजत्- जरायुज: अण्डज: स्वेदज: उद्भिजश्च।[6] जरायुजानां निर्माणं पञ्चमहाभूतानां संयोगमेव अस्ति। पञ्चतत्वार्थात्- "पृथिव्याकाशतेजवायवाप:" अस्य अर्थ: क्रमश: मृदा अन्तरिक्ष: अग्नि: वायु: जलञ्च।[7]

यद्यपि एते पञ्चतत्वा: जीवस्य शरीरे एकस्मिन् एव समये न दृष्यन्ते तथापि सर्वे मिलित्वा एव मानवशरीरं क्रियाशील: कुर्वन्ति।

एतेषां तत्वैः सह कार्यं वयं जानीमः यत् कथं स्वस्थशरीरं प्राप्तः करणीयः, कथमोत्तमं स्वास्थ्यं स्थिरं करणीयं, कथं सम्पूर्णजीवनं दुःखमुक्तं जीवेम। विश्वे बहवः प्राचीनदर्शनाः ब्रह्माण्डस्य संरचनां पञ्चतत्वेषु वर्गीकृतम्। "पृथ्वी-जल-अग्नि-वायु-आकाश" एते एव "पञ्चमहाभूत" संज्ञकाः। यथा ठोसपदार्थः पृथ्वीतत्वः, तरलपदार्थः जलतत्वः, गैसपदार्थः वायुतत्वः, अग्नि प्रकृत्याः तद् भागम् अस्ति येन पदार्थस्य अवस्थायां परिवर्तनं भवति, आकाश अन्य तत्वानाम् अपि च उच्चाध्यात्मिक अनुभवानामाधारः अस्ति।सृष्ट्यारम्भादेव मानवदेहस्य पञ्चतत्वैः सह प्रकृत्याः पञ्चतत्वानां अद्भुतसम्बन्धः अस्ति। अस्याः सृष्ट्यः उत्पत्तिः पञ्चभूतैः भवति। मानवशरीरमपि विभिन्नानुपाते एतेषां पञ्चतत्वानामुत्पादः अस्ति-"यत्पिण्डे तद्ब्रह्माण्डे" अर्थात् लघुतमकणे ये तत्वाः सन्ति तेनैव ब्रह्माण्डः निर्मितः।[8] मनुष्यशरीरे पञ्चमहाभूताः विभिन्नानुपाते वर्तन्ते यथा- ७२% जलम्, १२% पृथ्वी, ६% वायुः, ४% अग्नि, शेषाकाशः। जरायुजानि जरायुजेभ्यो जातानि मनुष्यपशवादिनि अर्थात् माताजनकाभ्याम् प्राप्तः अयं शरीरः मरणोपरान्त महाभूतेषु एव विलीनः भविष्यति।[9] अत्र परस्परतायाः सम्बन्धः भवति।[10]

**पृथ्वीः-**

लोकेऽस्मिन् समेषां प्राणिनाङ्कृते आश्रयप्रधानत्वाद् वसुन्धरा अयमस्माकं जननी वर्तते अतः तस्याः स्थानं स्वर्गादपि श्रेष्ठोस्ति।[11] सम्पूर्णं विश्वमिदं पृथ्वी एव धारयति।[12] शरीररचनायां पृथिवीतत्त्वानन्तरं जल-तेजः-वायु-नभसामंशो उत्तरोत्तरं न्यूनतां वहति।

प्रासाददृष्ट्या निर्मीयमाणस्य कस्यचिद् भवनस्य विषये विचिन्तयामश्चेत्तत्र पञ्चमहाभूतानामयमेव क्रमः भवति। भारतीयदार्शनिकाः प्रत्येकजडतत्त्वं चेतनाधिष्ठितं मन्यन्ते। चेतनतत्त्वमेव जड़तत्त्वानां नियन्ता, सञ्चालकश्चास्ति। पृथिव्या अप्येकं चिन्मयस्वरूपमस्ति। एतत् स्वरूपमेव पृथिव्या आदिदेवताऽस्ति। एतदेव स्वरूपं "श्री देवीति भूदेवीति" च नाम्ना व्यवह्रियते। इयं चिन्मयी देवी स्थूलायाः पृथिव्या अधिष्ठात्री अस्ति। अथर्ववेदस्य पृथिवीसूक्ते द्वयोः स्वरूपयोः आधिभौतिक-आधिदैविकयोः स्तवनं कृतमस्ति।[13] यतोहि आदिभौतिक रूपे सा भवन पर्वतदिनां धारयति आदिदैविक रूपे सा प्राकृतिक आपदासु अस्मान् संरक्ष्यति। पृथ्वी भूतवर्तमान-भविष्यकालीन पदार्थानामुत्पादिका भवति तान् च परिपालयति। पृथ्वी अस्माकं उपासकानां कृते निवासस्थानं विस्तीर्णमानुकूलञ्च करोति। मन्त्रेऽस्मिन् सम्पूर्णा भूमिः मातृरूपेण दृश्यमाना भवति महद्भक्त्या च विश्वगर्भायाः वसुधायाः गुणगानं कृतमस्ति। भूदेवीयं स्वसेवकानाङ्कृते विभूतिरूपेण परिणता भवति। एतदेव कारणं यत् प्राणिनां पृथिव्या सह नैसर्गिको भावनात्मकश्च सम्बन्धोऽस्ति।[14] पृथिव्याः प्रमुखा विशेषतेयं यदस्यां प्राणिनां स्थितिः धरातलनिर्मितः, शैलसंरचना, मृत्तिकायाः विविधरूपाणि च सम्मिलिताः भवन्ति।

पृथिवी गुरुत्वशक्तेः चुम्बकीयशक्तेश्च केन्द्रमस्ति। वैज्ञानिकानां मतानुसारं सार्धचतुरार्धवर्षाणि प्राक्-पृथिव्याः रचना जाता। तदारभ्य स्वाक्षीयभ्रमणस्य कक्षीयभ्रमणस्य च कारणादेव पृथिवी गुरुत्वाकर्षणशक्तियुता चुम्बकीयशक्तिसमन्विता च भवति।

पृथिव्याः घूर्णनगतेः कारणादेव वायवः, नदीधाराश्च उत्तरीगोलार्धे दक्षिणदिशि दक्षिणीगोलार्धे च वामदिशि परिवर्तिताः भवन्ति। पृथिव्याः गुरुत्वशक्तेः चुम्बकीयशक्तेश्चैव प्रभावोऽस्ति यदन्तरिक्षवद् गतिशून्यता अत्र नास्ति।

1. भूम्यां देवेभ्यो ददति यज्ञं हव्यमरं कृतम्, भूम्यां मनुष्या जीवन्ति स्वधयान्नेन मर्त्याः सा नो भूमिः प्राणमायुर्दधातु जरदृष्टिं मा पृथिवी कृणोतु। (अथर्ववेदः 12/1/22 पृथ्वीसूक्तम्)

2. माता भूमिः पुत्रोऽहं पृथिव्याः ॥ (अथर्ववेदः 12 पृथ्वीसूक्तम्)

पृथिव्याः चुम्बकीयसिद्धान्तानुसारं वास्तुशास्त्रं प्रवर्तते। वास्तुशास्त्रिणां मते भवननिर्माणे भारयुतानि वस्तूनि दक्षिणदिशि नैऋत्यकोणे च संस्थापनीयानि। गुरुत्वशक्त्या चुम्बकीयशक्त्या चैव पृथ्वी प्राणिनां जीवने गतिं प्रददाति। स्वधरातले निर्मितानां भवनानाङ्कृते घनाधारञ्च प्रददाति। भवननिर्माणे पृथिवीतत्त्वस्यास्य सदुपयोगः कथं भवेत् ? इति प्रश्नस्यैव चिन्तनं वास्तुशास्त्रेषु विस्तृत्य कृतमस्ति। यथा- विविधविधिभिः भूमेः परीक्षणं, लक्षणानुसारं मृद्गुणशालिताविचारः, शल्यशोधनं भूप्लवत्वाधारेण भूखण्डचयनं, भूखण्डस्याकृतयः विस्तृतयश्च। एतदर्थं प्रासादनिर्माणे पृथिवीतत्त्वमवश्यमेव संध्यातव्यमिति।

**जलम्:-**

जलं प्राणिनां वनस्पतीनाञ्च कृते प्राणधारकत्वेनोपयुज्यते। अतः जलतत्त्वं मज्जीवनयापने अपरिहार्यतां वहति। प्राणिनां रक्ते अशीतिप्रतिशतं यावती मात्रा जलस्यैव भवति। वनस्पतिषु चेयं मात्रा अधिका भवति। अतो द्वयोः वर्गयोः कृते जलतत्त्वं 'जीवनाधार' इत्युच्यते। वैदिकवाङ्गमये जलस्य अन्यनामानि अपि विद्यन्ते।[15] अमरकोषानुसारेणापि बहवः नामानि स्वीकृतानि।[16] प्राणिनः पशुपक्षिणश्च जलं पीत्वा, वनस्पतयश्च मूलैः जलं गृहीत्वा जीवनं धरन्ति। सम्पूर्णपृथिव्याः तृतीयांशद्वयभागे जलं विद्यते। समुद्राः, नद्यः. सरोवराश्च विषयेऽस्मिन् प्रमाणी-भूता इति। पृथिव्यां जनानामावासः तत्रैव आधिक्येन समुपलभ्यते यत्र जलस्य संप्राप्तिः निर्विघ्नतया भवति। अतिवृष्टि-हिमपातप्रभावितेषु क्षेत्रेषु भवनानां छादनेषु प्रवणत्वं भवति। येन तदुपरि हिमजलयोः संघातो नावतिष्ठते। अल्पवृष्टिप्रभावितेषु क्षेत्रेषु गृहे एव जलसंग्रहणस्योचिता व्यवस्था क्रियते। समुद्रतटीयक्षेत्रेषु समुद्रचक्रवातमपसारयितुं गृहाणि परितः सुरक्षाभित्तयो निर्मीयन्ते। अतः वास्तुशास्त्रदृष्टया जलतत्वस्य महत्वं बृहद्वास्तुमालायामेवमुक्तम्[17]-

भवननिर्माण जलस्योपलब्धिः उचितरूपेण भवेदेतदर्थं विविधजल-संसाधनानि उपयुज्यन्ते। संसाधनानां यथा कूपः, नलकूपः, जलाशयः, भूमिगतजलागारश्चेत्यादीनां उपयुक्ता स्थितिः भवनस्य कस्मिन् भागे भवेदस्यापि सुष्ठुचिन्तनं वास्तुशास्त्रे क्रियते।[18] आग्नेय वायव्य नैऋत्य कोणानतिरिच्य अन्य दिशायां जलव्यवस्था भवितुमर्हति। आधुनिक जलभण्डार स्थान विषये मुहूर्तचिन्तामनीकारः रामदैवजस्य मतमस्ति यत् इशान कोणे पूर्वदिशायम् जलस्थानं शुभकारको भवति।[19] बृहत्संहितायाः वास्तुविद्याध्याये किञ्चिद् मतभेदः दृश्यते।[20]

**तेजः (अग्निः)**

शरीररचनायां तेजस्तत्त्वस्यापि महत्स्थानमस्ति। प्राणिषु विद्यमानं चेतनतत्त्वं प्राणरूपेण गृह्यते **'अग्निर्वै प्राणः'** इत्युक्तत्वाद् अग्निः अमृतदेवतारूपे परिगणितोऽस्ति। वेदेष्वपि अग्नेः महिमा संवर्णितोऽस्ति। अग्निरेव अमृतदेवोऽस्ति, यश्च मर्त्यभूतेषु समाविष्टो वर्तते।[21] भौतिकदेहेऽस्मिन् यावत्पर्यन्तं तेजो वर्तते, तावत्पर्यन्तमेव प्राणिनः सत्ताऽस्ति। अस्मिन् विश्वे यावत्योऽपि गतयस्तत्र अग्निरेव हेतुरिति। अग्नेः मुख्यं स्रोतः सूर्य: अत: सूर्य: जगदात्मनो रूपे प्रतिष्ठितोऽस्ति। सम्पूर्णं वायुमण्डलं सूर्येणैव प्रकाशमानम्भवति। भौगोलिकवैविध्यकारणात् पृथिव्यां सौररश्मीनां वितरणं प्रभावितम्भवति। धरातले सौररश्मीनामसमानप्राप्त्या जलवायवपि वैभिन्यं भवति। प्रासादनिर्माणे भवननिर्माणे वा एषा स्थितिः अवश्यमेव ध्यातव्या, यत्र 'द्वाराणि, अलिन्दः, पाकशाला गवाक्षश्चेत्यादीनामौचित्यपूर्णा संस्थितिः जायेत। भवन निर्माणे अग्नितत्त्वप्रमुखानां सर्वोपकरणानां स्थापना आग्नेयकोणे एव विनिर्दिष्टाऽस्ति।[22]

**वायुः**

सम्पूर्णलोकस्य जीवनयापने वायुरतिमहत्त्वपूर्णं तत्त्वमस्ति। प्राणी भोजनं विना एकमासं यावत् जलं विना सप्ताह यावज्जीवति**,** परन्तु वायुं विना पञ्चक्षणमपि जीवितुं नार्हति। विज्ञानमते पृथिवी परित: गैसीयपदार्थानामावरणमस्ति यद्वायुमण्डलं संकथ्यते। पृथिव्यां न केवलं स्थलचराः**,** नभश्चराः**,** जलचराश्च वायुसाहाय्येन वसन्ति**,** अपितु वृक्षा**:** वनस्पतयश्चापि वायुमवलम्ब्यैव जीविता: भवन्ति। पृथिवी वायुविहीना भवति चेदत्र न मेघाः जायन्ते**,** न वर्षा भवति। वायुमण्डले विद्यमानः **'ओजोन'** इति वायुविशेषः सूर्यस्य पराबैंगनीरश्मीन् शोषयति। येन पृथिवीस्थ जीवानां अतिशयेन तापेन सुरक्षा भवति। भारतीय**-**वैदिक**-**विज्ञानानुयायिभिः वायवः पञ्चविधाः मन्यन्ते **"प्राणापानव्यानोदानसमान"** इति प्राणिनां शरीरे यावत्कालपर्यन्तं वायुः सक्रियो भवति तावत्कालपर्यन्तमेव जीवनं संचलति। यस्मिन् क्षणे वायुप्रवाहोऽवरुध्यते**,** तस्मिन् क्षणे शरीरमिदमपि परमशान्तिमाप्नोति।

वास्तुशास्त्रसिद्धान्तानुसारं**,** 'भवननिर्माणसमये विशुद्धवायोः संप्राप्तिर्यथा स्यात्**,** वातावरणमुचितं तथा स्यात्। यस्मिन् भूखण्डे प्रासादनिर्माणं भवननिर्माणम्वा जायमानमस्ति तत्र गवाक्षा: कर्तव्या: अनेन शुद्धवायुप्रवाहः भवति। वायुतत्वस्य स्थानं भवनेषु उत्तरत: पश्चिमदिशापर्यन्तमुचिता कथिता।[23] भवनेषु वायुप्रवाह्यार्थं पूर्व उत्तर अपि च पश्चिम दिशा उत्तमा शुभकारका भवति**,** दक्षिणदिशा नोचिता।[24]

**आकाश:**

पूर्वोक्तानां चतुर्णामपि महाभूतानां संव्याप्तिरनेन तत्त्वेन क्रियते अतः आकाशतत्त्वस्य स्वीयं विशिष्टं महत्त्वमस्ति। चतुर्णामपि भूतानां कार्याणि आकाशे एव जायन्ते। पृथिव्याः परमाणवः आकाशे एव भवन्ति। पार्थिवपरमाणुनिर्मितानि भूमण्डलानि**,** लोकाश्चान्ये**,** आकाशे एव भवन्ति।

सम्पूर्णोऽयं ब्रह्माण्डः तत्त्वेऽस्मिन्नेव सावकाशो निरवशेषश्च स्थितोऽस्ति ब्रह्माण्डेऽस्मिन् आकाशकारणादेव पृथिव्यादीनां व्यूहो न एकत्रीभवति। आकाशश्चेद् अव्यूहरूपे व्यक्तं न भवति तदा पृथिव्याः वर्तमानस्वरूपम् एतादृशं न स्यात्। नैव च अगणिता: लोकाः भवितुं शक्नुयुः यथा प्राणिनः शरीरस्य समस्तान्यङ्गानि स्वक्रियायाः सम्पादनम् आकाशसाहाय्येनैव कुर्वन्ति**,** तथैव भवनस्य आभ्यन्तर**-**बाह्यभूताः समस्ता अपि गतिविधयः आकाशोपलब्ध्यैव जायन्ते।

मानवजीवने मुक्ताकाशस्य महत्त्वं निर्विवादमस्ति। मानवजीवने वास्तुशास्त्रे भवननिर्माण सिद्धान्तेषु भवनं परितः भवनस्य मध्ये च मुक्तस्थाननिर्मिते**:** विधानमस्ति।[25] आधुनिककाले एतत् मुक्तस्थानं भवनेषु ब्रह्मस्थाने एव भवति। यतोहि आधुनिककाले जनानां समीपे भूभागस्य अभाव: एव दृष्यते अपि च एकस्मिनैव भूभागे दशतलाधिकापि शालानां विधानमस्ति। अस्यकृते सोसाइटीफ्लैट वा बिल्डरफ्लैटिति पदस्य प्रयोग: भवति। यत्र लघुभूभागे बहव: परिवारा: निवसन्ति।

**प्राकृतिकशक्तय:**

प्रकृति**:** पदस्य सामान्यार्थ**:** भवति मूलरूपः। कस्यापि पदार्थस्य वा द्रव्यस्य प्राथमिक स्थिति तस्य प्रकृत्या: आधार**:** वा प्रकृति**:** अस्ति। भारतीय ग्रन्थेषु प्रकृति पदः भौतिकशरीर**-**पदार्थ**-**प्रत्यक्षाप्रत्यक्ष**-**ब्रह्माण्डस्य परिचारकः अस्ति।[26]

अस्मिन् ब्रह्माण्डे सर्वशक्तियुक्ता**:** प्रकृत्येव। अस्याः पृथिव्याः अप्येकं प्राकृतिकमूलरूपं भवति। इयं प्रकृतिः त्रिगुणात्मिकास्ति**,** पृथिव्या: स्वबलं सृष्ट्या**:** मूलाधारः अस्ति। प्राकृतिकशक्त्य**:** अनन्ताः सन्ति येषां मध्ये सृष्ट्यारम्भ-विकास-अन्तश्च प्रकृयानां सञ्चालनं भवति।[27]

एतासामनन्तशक्तिनां यदि विभाजनं भवेत तर्हि त्रिषु भेदेषु विभक्ता: जाता:। एते त्रय: भेदा: सन्ति- गुरुत्वशक्ति चुम्बकीयशक्ति सौर-ऊर्जा च। एतासां तिसृणां शक्तिनामोपयोगेन शरीरमनजीवनश्च सक्षमसंतुलितं कर्तुमावासस्य येषां नियमसिद्धान्तप्रविधिनां प्रतिपादनं भवति तेषां संकलितरूपमेव वास्तुशास्त्रे अस्ति। अतः वास्तुशास्त्रे प्राकृतिकशक्त्य**:** महत्यावश्यकतास्ति।

**(1) गुरुत्व शक्तिः -**

गुरुत्वाकर्षण शक्ति**:** पृथिव्याः आकर्षणबलमस्ति। भास्कराचार्या**-**नुसारेण[28]-

अस्य भाव: पृथिव्याः स्वाकर्षणबलेन आकाशे स्थिताः खगोलीयपिण्डाः पृथिव्याः उपरी पतन्ति। गरुत्वस्य अर्थ**:** भवति भारयुक्तपदार्थस्य अथवा स्थूलपदार्थस्य द्रव्यमान**:**। द्वयोर्पिण्डयोर्मध्ये स्थापित: आकर्षणबलमेव गुरुत्वाकर्षणबलं भवति। परमाकाशगंगाया: सञ्चालनस्य कारणमपि गुरुत्व बलमिवास्ति। अनेन एव पिण्ड**-**ग्रहादिनां घूर्णनप्रक्रिया सिध्यते। ग्राम-गृह- भवनादि स्थायित्वपि गुरुत्वबलेन सिध्यति। गृहस्य चत्वारः भेदाः अपि अस्य संकेतः स्फुटिकुर्वन्ति यत् स्थायित्व परिमाणमपि सुदृढसुरक्षित दृष्ट्या कष्ठनिर्मितगृहस्य अपेक्षया इष्टिकानिर्मितगृहाणि इष्टिकानिर्मितगृहस्य अपेक्षया पाषाणनिर्मितगृहाणि उत्तरोत्तरोपयुक्त**:** सुविधाजनकाश्च भवन्ति।[29] न केवलं गृह निर्माणमपि च गृहस्याधारः अर्थात मूलभूभागचयनगुरुत्वस्य केन्द्रविषये अपि लिखित:।[30] यदि भूभाग**:** अशुद्ध**:** भविष्यति तर्ही नकारात्मकता एवं आकर्षयिष्यति।

## 2. चुम्बकीय शक्तिः -

चुम्बकीय क्षेत्रं कस्यापि चुम्बकीय पदार्थस्य वा गतिशीलविद्युतावेशस्य परिस्थापितं क्षेत्रं भवति यस्यान्ते चुम्बकत्व बलं कार्यं करोति। अयं सम्पूर्णब्रह्माण्डः चुम्बकीयतरङ्गानां प्रवाहः एवास्ति। साधारणशब्देषु सकारात्मकनकारात्मकश्च तरङ्गात्मकगतिः चुम्बकीयशक्तिः भवति। ब्रह्माण्डे तरङ्गानां नियन्त्रणं सञ्चारश्च चुम्बकीयक्षेत्रम्। चुम्बकीयक्षेत्रस्य मूल-इकाई टेस्ला**(tesla)** तथा च चुम्बकीयबलस्य न्यूटन**(newton)** इति भवति।

भारतीयवास्तुशास्त्रीय आचार्यैः स्वग्रन्थेषु शयनसिद्धान्तेषु अस्य प्रतिपादनं पूर्वमेव कृतं। आचार्यानुसारेण मनुष्यशरीरः निद्राकाले सर्वतो निष्क्रियः भवति अतः तस्मिन् समये कोऽपि दुःख शीघ्रमेव देहोपरि आक्रमणं कर्तुं शक्नोति। तेषां अनुसारेण शरीरस्य उपरि भागः दक्षिण वा पूर्वदिशायां भवेत् तथा च अधोभागः उत्तर वा पश्चिमदिशायां अनेन रोगाणां वा दुःखानां प्रभावः न भवति। अनुचितदिशायां शयनेन रक्तसंचारसमस्या शिरोवेदना दुःस्वप्न वातव्याधि बाधा इत्यादयः रोगाः शरीरान् बाध्यते।[31,32].

चुम्बकत्वस्य ऐतिह्यं ६०० ई.पू. वर्णितमस्ति। चुम्बकीय क्षेत्रस्य ध्रुवद्वयं वर्तते तथैव यथा पृथिव्याः स्तः "उत्तरीध्रुवः दक्षिणीध्रुवश्च"। यदि द्वयोः चुम्बकयोः सजातीयध्रुवे परस्परयोः सम्मुखे स्थापयामः तर्हीं तौ विपरीतदिशायां गच्छतः, विपरीत परिस्थित्यां यदि विजातीयध्रुवौ परस्परयोः सम्मुखे स्थापयामः तर्हीं तौ आकर्षयतः। पाश्चात्य वैज्ञानिकानुसारेण विंशतिशताब्देः अस्य विषये शोधः आरब्धः। विद्वान्सानुसारेण अस्य नियमस्य वक्ता "पेट्स पेरेग्रीनस डी मैरीकोर्ट" महोदयः अस्ति।[33]

एतत् शोधः 1269 तमे वर्षे अभवत्। त्रीशताब्द्यनन्तरं "विलियम गिल्बर्ट" महोदयेनोक्तं यत् पृथ्वी एकचुम्बकः अस्ति।[34] अतः मनुष्याणां कृते आवश्यकमस्ति यत् एतस्मिन् नियमानुसारेणैव शयनस्य दिशा निश्चितं कुर्युः। वास्तुशास्त्रप्रमाणेन निर्मिते गृहे ऊर्जायाः सततं प्रवाहः जायते। उत्तरध्रुवतः दक्षिणध्रुवोपरि ऊर्जा प्रवहति। वास्तुशास्त्रप्रमाणेन निर्मिते गृहे उर्जायाः प्रभावात् शक्तेः सञ्चरणेन भयं नष्टो भवति मोदश्च जायते।[35]

## सौर ऊर्जा: -

पृथिव्याः प्राकृतिक ऊर्जायाः मुख्य तथा च आदि ऊर्जा-स्रोतः सूर्यः एव अस्ति। एतदर्थं सूर्यस्य स्थानं अस्माकं वेदेषु देवता रुपेणास्ति। सूर्यसमर्पिताः वेदेषु चतुर्दशसूक्ताः सन्ति। सूर्यविकिरणैः पृथ्वेः ऊर्जा-ऊष्मा/तापः प्रकाशश्च अस्मभ्यः जीवनेभ्यः गतिशीलता निर्मायन्ति। सूर्यात् निष्क्रियमाणाः सूर्यरश्म्याः प्रतिदिनं नभचरास्थलचराणाञ्च क्रियाशीलाः गतिशीलाश्च भवितुं प्रेरयन्ति।[36] ऋग्वेदानुसारेण उदितः सूर्यः हृदयरोगान् पाण्डू (पीलिया) तथा च रक्ताल्पता दूरी करोति।[37]

श्रीमद्भागवतानुसारेण "आरोग्यं भास्करादिच्छेत्" यदि निरोगी भवितुमिच्छन्ति तर्हिं सूर्यस्य शरणे गच्छन्तु। सः अस्माकं दिनचर्यानियन्त्रितं तथा च व्यवस्थितं करोति। अर्थात् यस्य उदयादनन्तरं सम्पूर्णजगतः जगति, मध्यकाले स्वकार्याणि सम्पादयति तथा च अस्तकाले गृहं गत्वा भोजनादि व्यवहृत्य स्वपिति। अयं प्रकारकः भुवन भास्करप्रभोः अस्माकं नमस्कारः। अनेनैव वास्तुशास्त्रे सूर्यदेवतायाः सर्वोत्तमः स्थानमस्ति। अतः गृहे पूर्वभागः रिक्तः भवेत् एतत् आचार्यादिनां मतमस्ति।

## सारांश: -

एवं वास्तुशास्त्रे विहितसिद्धानुसारेण पञ्चमहाभूतानां विधिव-तोपयोगेन निर्मितः आवासे पञ्चभौतिकतत्वयुक्तानां समस्तजीवानां कायिक-वाचिक-मानसिक क्षमतायाश्च विकासः स्वयमेव वर्तते। अस्मिनेव विशेषता कारणेन प्रत्येकजीवधारिणः कोऽपि स्थानः विशेषतः प्रियः भवति। कस्यापि व्यक्तिविशेषस्य शारीरिकमानसिकयोः क्षमतयोः विकासः कुत्रचित् स्थानविशेषेषु गत्वा शीघ्रं स्फुर्तिवानः भवति। अस्मिन् दृष्टः जगति आकाशादि पञ्चमहाभूतानामेव सत्ता व्याप्तः अतः एतेषां समन्वयस्य सतताव्ध्यानेन समस्तप्रकारकः निर्माणकार्यं कर्तव्यम्।

## सन्दर्भग्रन्थसूची


| क्र.सं. | ग्रन्थनाम | लेखकः/ संपादकः/ प्रकाशनम् / वर्षम् |
|---|---|---|
| 01. | अद्भुतसागर | श्रीमद्बल्लालसेनदेवप्रणीत, चौखम्बा सुरभारती प्रकाशन,वाराणसी,2006 |
| 02. | अग्निपुराणम् | गीताप्रेस गोरखपुर, संवत् 2070 |
| 03. | अर्थशास्त्रम् | लौगाक्षिभास्करविरचितः,चौखम्बा सुरभारती प्रकाशन वाराणसी,2002 |
| 04. | अर्थशास्त्र | चाणक्य, चौखम्बा संस्कृत सीरीज, वाराणसी,2006 |
| 05. | अपराजितपृच्छा | भुवनदेवाचार्य, परिमल पब्लिकेशन, दिल्ली – 2011 |
| 06. | अथर्ववेदसंहिता | सायणाचार्य, कृष्णदास अकादमी, वाराणसी,संवत् 2045 |
| 07. | अर्वाचीनज्योतिर्विज्ञानम् | रमानाथसहायः, संपूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, 1964 |
| 08. | अष्टाध्यायी | पाणिनी, चौखम्बा संस्कृत सीरीज, वाराणसी, 2003 |
| 09. | कादम्बिनी | म.म.मधुसूदनओझा, श्रीमधुसूदन वैदिक विज्ञान प्रकाशक,जयपुर , सं.1999 |
| 10. | ज्योतिर्विज्ञानम् | अर्कसोमयाजिना श्रीधूलिपालेन विरचितम् वाराणसेयसंस्कृतविश्वविद्यालयः शकाब्दः 1886 |
| 11. | ज्योतिर्विदाभरणम् | श्रीकालिदासप्रणीतं,प्रो.रामचन्द्रपाण्डेय, मोतीलालबनारसीदास,दिल्ली, 2011 |
| 12. | तैत्तिरीयोपनिषद् | गीताप्रेस गोरखपुर संवत्-2068 |
| 13. | दुर्गासप्तशती | गीताप्रेस, गोरखपुर,2001 |
| 14. | नारदपुराणम् | गीताप्रेस, गोरखपुर,1995 |
| 15. | नारदसंहिता | देवर्षिनारदमहामुनिप्रणीता, चौखम्बासंस्कृतभवन, वाराणसी,संवत् 2065 |
| 16. | पञ्चभूत-विज्ञानम् | उपेन्द्रनाथदासः, चौखम्बा अमरभारती प्रकाशन, वाराणसी – 1962 |
| 17. | बृहत्संहिता | वराहमिहिर विरचित, चौखम्बा विद्या भवन, वाराणसी, 2009 |
| 18. | बृहत्संहिता(खण्ड:1-2) | आचार्य वराहमिहिर, व्याख्या - नागेन्द्रपाण्डेयः, संपूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी 2002 |
| 19. | बृहत्संहिता | वराहमिहिरविरचित, भट्टोत्पलटीकासहिता, व्याख्याकारः अच्युतानन्द झा, चौखम्बा विद्याभवन, वाराणसी, 1917 |
| 20. | ब्रह्मपुराणम् | महर्षिवेदव्यास,हिन्दी साहित्य सम्मेलन, प्रयाग, सन् 1993 |
| 21. | भद्रबाहुसंहिता | डॉ.नेमिचन्द्र ज्योतिषाचार्यः , भारतीयज्ञानपीठ,2009 |
| 22. | भविष्यपुराणम् | महर्षिवेदव्यासः,खेमराजकृष्णदास अकादमी, मुम्बई , 1967 |
| 23. | भुवनकोशविमर्शः | प्रो. डी.पी.त्रिपाठीजी, अमर ग्रन्थ पब्लिकेशन, नई दिल्ली, सन् 2004 |
| 24. | मत्स्यपुराणम् | गीताप्रेस, गोरखपुर, संवत् 2067 |
| 25. | महाभारतम् | महर्षिवेदव्यासः गीताप्रेस गोरखपुर, सन् 1957 |
| 26. | मार्कण्डेयपुराणम् | गीताप्रेस, गोरखपुर, संवत् 2064 |

| | | |
|---|---|---|
| 27. | मुहूर्तचिन्तामणिः | दैवज्ञरामाचार्यविरचिता, मोतीलाल बनारसीदास ,वाराणसी सन् 2008 |
| 28. | मुहूर्तचिन्तामणिः | श्रीरामदैवज्ञः, व्याख्याकारः श्री विन्ध्येश्वरी प्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 1990 |
| 29. | वसिष्ठसंहिता | ब्रह्मर्षि वृद्धवशिष्ठविरचिता, चौखम्बा संस्कृतभवन, वाराणसी, संवत् 2065 |
| 30. | वायुपुराणम् | वेदव्यासः, नाग पब्लिशर्स, देहली, 1999 |
| 31. | वाराही संहिता | बलदेवप्रसादमिश्रः, खेमराज श्रीकृष्णदास प्रकाशन, मुम्बई, सन् 1987 |
| 32. | विष्णुपुराणम् | वेदव्यासः , गीताप्रेस, गोरखपुर , 1961 |
| 33. | विष्णुधर्मोत्तरपुराणम् | नाग, पब्लिशर्स, देहली, 1994 |
| 34. | वास्तुमण्डनम् | सूत्रधारमण्डनम् चौखम्बा सुरभारती प्रकाशन, वाराणसी – 2009 |
| 35. | श्रीमद्भागवतपुराणम् | श्रीवेदव्यासः, गीताप्रेस, गोरखपुर, संवत् 2059 |
| 36. | श्रीमद्वालमीकीरामायणम् | गीताप्रेस, गोरखपुर, संवत् 2065 |
| 37. | समराङ्गणसूत्रधारः | भोजदेवः, चौखम्बा संस्कृत सीरीज – 2011 |
| 38. | संग्रहशिरोमणिः | कमलाकान्तशुक्ल, संपूर्णानन्दसंस्कृत विश्वविद्यालय, वाराणसी , सन् 1994 |
| 39. | सांख्यकारिका | चौखम्बा विद्याभवन वाराणसी सन् 2001 |
| 40. | सिद्धान्तशिरोमणिः | श्रीमद्भास्कराचार्यविरचितः, व्याख्या- पं. केदारदत्तजोशी, मोतीलालबनारसीदासः, देहली, 2010 |
| 41. | सूर्यसिद्धान्तः | आर्षः , चौखम्बा संस्कृत भवन , वाराणसी , 2006 |
| **शोधपत्रिका** | | |
| 42 | मार्तण्डपंचांगम् | आचार्यप्रियव्रतशर्मा, रूचिकापब्लिकेशन्स। |
| 43 | शोधप्रभा | श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविद्यापीठम्, नव देहली। |
| 44 | रचनाविमर्शः | हंशाप्रकाशनम्, जयपुरनगरम्। |
| 45 | भारती | बी-15 भारती भवन , न्यू कॉलोनी जयपुरम्। |
| 46 | विज्ञान प्रगति | सूचना निदेशालय , नई दिल्ली। |
| 47 | सरस्वती सुषमा | सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी |
| 48 | आन्वीक्षिकी | उत्तराखण्डसंस्कृतसंस्थानम्, उत्तराखण्डम्। |
| 49 | वास्तुशास्त्रविमर्श | श्रीलालबहादुरशास्त्रराष्ट्रीयसंस्कृतविद्यापीठम् , नव देहली |
| 50 | संस्कृत-हिन्दी कोश | आप्टे, वामश शिवराम, मोतीलाल बनारसी दास, दिल्ली,१९६१ |


## पाद टिप्पणी

1.स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदम्। जन्तूनामयनं सुखास्पदमिदं शीताम्बुधर्मापहम्॥ वापी-देवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते। गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः ॥ बृहद्वास्तुमाला श. 4

2. कोटिघ्नं तृणजे पुण्यं मृण्मये दशसङ्गुणम् । ऐष्टिके शतकोटिघ्नं शैलेऽनन्तं फलं गृहे ॥५॥ बृहद्वास्तुमाला श. 4

3.The Ayurvedic Encyclopedia, The Human Universe p.no.13

1. गृहकरणयोग्यभूमिः, "वसन्ति प्राणिनो यत्र"- शब्दकल्पद्रुम् पृ. सं. 358

2. "गृहरचनावच्छिन्नवास्तुभूमि:"- तत्रैव

3. वेश्मभूर्वास्तुस्त्रियाम् - अ०को०, काण्ड-2, पुरवर्ग, 19

4. "गृह क्षेत्रमारामः सेतुबन्धस्तटाकमाधारो वा वास्तु:" – अर्थशास्त्र.3|8|61|2

5. A Sanskrit-English dictionary, Monier Williams, p. no. 948

6. अण्डजानि अण्डेभ्यो जातानि पक्षिपन्नगादीनि। उद्भिज्जानि भूमि उद्भिद्य जातानि कक्षवृक्षादीनि। स्वेदजानि स्वेदात् जातानि यूकमशकानि। (पातञ्जलीययोगचिकित्सापद्धतिः पृ.१२५)

7. तर्कसंग्रह पृ.सं. 4

8.सम्बन्धश्च त्रिष्ठोऽस्ति पंचतत्वैस्तु वास्तुनः। तेषामणुप्रमावैर्हि जायते भूमिजागृतिः ॥ वास्तुश्रृङ्गारदर्पणम् श. 22

9. सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः । सूक्ष्मास्तेषां नियता, मातापितृजा निवर्तन्ते ॥ सांख्यकारिका 39

10.तस्मात्तत्वसंयोगादचेतनं चेतनावदिव लिङ्गम् । गणकर्तत्वेऽपि तथा कर्तेव भवत्युदासीनः ॥ सांख्यकारिका 20

11."जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" - रामायण युद्धकाण्ड

12. अथर्ववेद 12.1.1

13.भूम्यां देवेभ्यो ददति यज्ञं हव्यमरं कृतम्, भूम्यां मनुष्या जीवन्ति स्वधयान्नेन मर्त्याः सा नो भूमिः प्राणमायुर्दधातु जरदृष्टिं मा पृथिवी कृणोतु। (अथर्ववेदः 12/1/22 पृथ्वीसूक्तम्)

14. माता भूमिः पुत्रोऽहं पृथिव्याः ॥ (अथर्ववेदः 12 पृथ्वीसूक्तम्)

15. निघन्टु 1.12

16.कदम्बमुदकं पाथः पुष्करं सर्वतोमुखम्। अम्भोऽनस्तोयपानीयनीरक्षीराम्बुशम्बरम् ॥ अमरकोष 1|10|3|1|6

17.अनूषरा स्निग्धवती प्रशस्ता च बहूदका । तृणापलान्विता या सा मान्या वास्तुविधौ धरा ॥ बृहद्वास्तुमाला 1/77

18.बृहत्संहिता दकार्गलाध्याय श. 97-98

19.मु. चि. 20

20.बृहत्संहिता 53.119

21.ऋग्वेद – 6/9/4

22.बृहत्संहिता 53.118

23.वास्तुतत्वविचार ३अ०

24.वास्तुश्रृङ्गारदर्पण श. 55-56

25.मर्मशूलं च यत्नेन वर्जयेद् वास्तुकोविदः । सूत्रादीनां गृहाङ्गैश्च पीडा चेत् सर्वनाशनम् ॥ (मयमतम् 27/17)

26. धर्म एवं प्रकृति विश्वकोषक

27. सांख्यकारिका का.३

28.आकृष्टशक्तिश्च मही तया यत् खस्थं गुरु स्वाभिमुखं स्वशक्त्या। आकृष्यते तत्पततीव भाति समे समन्तात् क्व पतत्वियं खे।।सि.शि.म.भुवन कोश- 6.

29.कोटिघ्नं तृणजे पुण्यं मृण्मये दशसंगुणम्। ऐष्टिके शतकोटिघ्नं शैलेऽनन्तफलं गृहे॥ बृहद्वास्तुमाला 5.

30.पिपीलिका षोडशपक्षनिद्रा भवन्ति चेत्तत्र वसेन्न कर्ता ।। तुषास्थिचीराणि तथैव भस्मान्यण्डानि सर्पाः मरणप्रदााः स्युः। वराटिका दुःख कलिप्रदात्री कार्पास एवाति ददाति दुःखम्। काष्ठं प्रदग्धं त्वतिरोगभीतिर्भवेत्कलिः खर्परदर्शनेन । लौहेन कर्तुर्मरणं निगद्यं विचार्य वास्तु प्रदिशन्ति धीराः।। बृहद्वास्तुमाला 114-115

31. उत्तरे पश्चिमे चैव न स्वपेद्धि कदाचन, स्वप्नादायुः क्षयं याति ब्रह्महा पुरुषो भवेत् ॥ न कुर्वीत ततः स्वप्नं शस्तं च पूर्वदक्षिणम् ॥ पद्मपुराण, सृष्टि, 51.125-126

32. प्राच्यां दिशि शिरश्शस्तं याम्यायाथ वा पुनः । सदैव स्वपतः पुंसो विपरीतं तु रोगदम् ॥ विष्णुपुराण 3.11.111

33. The letter of Petrus Peregrinus on the magnet p.no.7– Often from the magnet, the steel recedes, Repelled by turns and re-attracted close.

34. ucl.ac.uk

35. गृहा मा विभीत मा वेषध्वम्। उर्ज विभ्रत एमसि। उर्ज विभ्रदवः सुमनाः सुमेधा ।। गृहाणैमि मनसा मोदमानः। (यजुर्वेद 30.41)

36. ऋग्वेद उषस् सूक्त (3म./61सू.)

37. उद्यन्नद्य मित्र मह आरोहन्नुत्तरा दिव" हृद्रोगं मम सूर्यं हरिमाणं च नाशाय। (ऋग्वेद 1म./50सू)